# श्रीमद् भागवत रसिक कुटुंब

## श्रीगङ्गास्तोत्रम्

देवि सुरेश्वरि भगवति गङ्गे त्रिभुवनतारिणि तरलतरङ्गे ।
शङ्करमौलिविहारिणि विमले मम मतिरास्तां(न्) तव पदकमले ॥ 1॥

भागीरथि सुखदायिनि मातस्तव जलमहिमा निगमे ख्यातः ।
नाऽहं(ञ्) जाने तव महिमानं(म्) पाहि कृपामयि मामज्ञानम् ॥ 2॥

हरिपदपाद्यतरङ्गिणि गङ्गे हिमविधुमुक्ताधवलतरङ्गे ।
दूरीकुरु मम दुष्कृतिभारं(ङ्) कुरु कृपया भवसागरपारम् ॥ 3॥

तव जलममलं(यँ) येन निपीतं(म्) परमपदं(ङ्) खलु तेन गृहीतम् ।
मातर्गङ्गे त्वयि यो भक्तः(ख्) किल तं(न्) द्रष्टुं(न्) न यमः(श्) शक्तः ॥ 4॥

पतितोद्धारिणि जाह्नवि गङ्गे खण्डितगिरिवरमण्डितभङ्गे ।

भीष्मजननि हे मुनिवरकन्ये पतितनिवारिणि त्रिभुवनधन्ये ॥ 5॥

कल्पलतामिव फलदाम् लोके प्रणमति यस्त्वां(न्) न पतति शोके ।
पारावारविहारिणि गङ्गे विमुखयुवतिकृततरलापाङ्गे ॥ 6॥

तव चेन्मातः(स्) स्रोतः(स्) स्नातः(फ्) पुनरपि जठरे सोऽपि न जातः ।
नरकनिवारिणि जाह्नवि गङ्गे कलुषविनाशिनि महिमोत्तुङ्गे ॥ 7॥

पुनरसदङ्गे पुण्यतरङ्गे जय जय जाह्नवि करुणापाङ्गे ।
इन्द्रमुकुटमणिराजितचरणे सुखदे शुभदे भृत्यशरण्ये ॥ 8॥

रोगं(म्) शोकं(न्) तापं(म्) पापं(म्) हर मे भगवति कुमतिकलापम् ।
त्रिभुवनसारे वसुधाहारे त्वमसि गतिर्मम खलु सं(म्)सारे ॥ 9॥

अलकानन्दे परमानन्दे कुरु करुणामयि कातरवन्द्ये ।
तव तटनिकटे यस्य निवासः(ख्) खलु वैकुण्ठे तस्य निवासः ॥ 10॥

वरमिह नीरे कमठो मीनः(ख्) किं(वँ) वा तीरे शरटः(ख्) क्षीणः ।
अथवा श्वपचो मलिनो दीनस्तव न हि दूरे नृपतिकुलीनः ॥ 11॥

**भो भुवनेश्वरि पुण्ये धन्ये देवि द्रवमयि मुनिवरकन्ये ।**

**गङ्गास्तवमिमममलं(न्) नित्यं(म्) पठति नरो यः(स्) स जयति सत्यम् ॥ 12॥**

**येषां(म्) हृदये गङ्गाभक्तिस्तेषां(म्) भवति सदा सुखमुक्तिः ।**

**मधुराकान्तापज्झटिकाभिः(फ्) परमानन्दकलितललिताभिः ॥ 13॥**

**गङ्गास्तोत्रमिदं(म्) भवसारं(वँ) वाञ्छितफलदम् विमलं(म्) सारम् ।**

**शङ्करसेवकशङ्कररचितं(म्) पठति सुखीस्तव इति च समाप्तः ॥ 14॥**

**॥ इति श्रीमच्छङ्कराचार्यविरचितं(ङ्) गङ्गास्तोत्रं(म्) सम्पूर्णम् ॥**